S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



**Inapplication,** *s.* आलस्यं, अनुद्योगः, कार्यनिवृत्ति *f.*, अप्रवृत्ति *f.*, अमनोयोगः, अनभिनिवेशः.

**Inapposite, Inappropriate,** *a.* अयोग्य, असंगत, अप्रस्तुत, विरुद्ध.

**Inappreciable,** *a.* अत्यल्प, क्षुद्र.

**Inapprehensive,** *a.* निःशंक, अकुतोभय, वीतभय.

**Inapt,** *a.* अपात्र, अयोग्य. **-itude,** *s.* अपात्रता, अयोग्यता. **-ly,** *adv.* अस्थाने, असंगतं.

**Inarticulate,** *a.* अव्यक्त, अस्पष्ट, अस्फुट, अव्यक्तपद-वर्ण-अक्षर. **-ly,** *adv.* अस्पष्टं, अव्यक्तं; गद्गदवाचा.

**Inartificial,** *a.* अकृत्रिम, सहज.

**Inasmuch as,** *adv.* यस्मात्, येन, यतः.

**Inattentive,** *a.* अनवधान, निरपे( वे )क्ष, अनासक्त, उपेक्षक, मंदादर, प्रमत्त, प्रमादिन्, अनवहित, अनिविष्टचित्त, शून्यहृदय. **-ly,** *adv.* सप्रमादं, अनवधानेन, प्रमादतः, असमीक्ष्य, अविमृश्य, निरपेक्षं. **-Inattention,** *s.* अनवधानं, अनपे( वे )क्षा, उपेक्षा, अनादरः, अननुरागः, अमनोयोगः, प्रमादः, शून्यहृदयत्वं.

**Inaudible,** *a.* अश्राव्य, कर्णागोचर; 'i. weeping' निःशब्दरोदनं.

**Inaugurate,** *v. t.* अभिषिच् 6 P, अधिकारे निविश् c. 2 प्रति-ष्ठा c. ( प्रतिष्ठापयति ), संस्कृ 8 U, उपक्रम् c., आरभ् c. (रंभयति). **-ion,** *s.* अभिषेकः, प्रतिष्ठापनं, संस्कारः; उपक्रमः.

**Inaurate,** *See* **Gild,-ed**.

**Inauspicious,** *a.* अशुभ, अमंगल, अभद्र, अकल्याण ( णी *f.* ). **-ly,** *adv.* अशुभं, अशुभलग्ने.

**Inborn, Inbred,** *a.* सहज, नैसर्गिक-स्वाभाविक ( की *f.* ), स्वभावज, अंतर्भव.

**Incalculable,** *a.* अगण्य, संख्यातीत. 2 अमित.

**Incandesce,** *v. t.* प्र-, ज्वल् 10, उत्-तप् c. **-ence,** *s.* अत्युष्णता, उच्चंडता. **-ent,** *a.* प्रज्वलन, उत्तप्त, अत्युष्ण.

**Incantation,** *s.* मंत्रः, अभिचारः, योगः, मंत्रप्रयोगः, माया; 'to use i. s' मंत्रैः वशीकृ 8 U or मुह् c., अभिमंत्र् 10 A, अभिचर् c.

**Incapable,** *a.* अक्षम, असमर्थ, अशक्त, अपर्याप्त, अनुचित, अयोग्य.

**Incapacious,** *a.* अपृथु, अविपुल, अविशाल, संकट, संबाध.

**Incapacitate,** *v. t.* शक्तिं हृ 1 P, अक्षमं-अक्षमी-कृ 8 U, अपात्री-अयोग्यं कृ.

**Incapacity,** *s.* असामर्थ्यं, अशक्ति, *f.*, अनर्हता, अयोग्यता, अपात्रता. 2 मेधाभावः, बुद्धिहीनता.

**Incarcerate,-ion,** *See* **Imprison,-ment**.

**Incarnadine,** *v. t.* अरुणीकृ 8 U. **-a.** रक्त, रुधिरताम्र, आताम्र.

**Incarnate,** *a.* मूर्त, मूर्तिमत्, देहवत्, शरीरिन्, शरीरबद्ध, देहिन्, सशरीर. 2 अवतारिन्, मनुष्यरूपधारिन्, गृहीतदेह, मनुष्यरूपेण अवतीर्ण **-ion,** *s.* अवतारः; शरीरधारणं, देहग्रहणं, मूर्तिमत्ता, सशरीरता; better by (*a.*); *See* **Embody** also.

**Incase,** *v. t.* भांडे नि-धा 3 U or निविश् c. 2 पि-धा, आवृ 5 U, आ-परि-वेष्ट् c., परि-आ-च्छद् 10.

**Incautious,** *a.* असमीक्ष्य-अविमृश्य-कारिन्, साहसिन्. 2 अनवधान, प्रमादिन्, प्रमत्त. **-Incaution,** *s.* प्रमादः, असमीक्षा; *See* **Inattention.**

**Incendiary,** *s.* गृह-अगार-दाहिन् *m.* **-Incendiarism,** *s.* गृहदाहः.

**Incense,** *s.* धूपः, तुरुष्कः, पिंडकः, सिह्लः, यावनः ( olibanum ); यक्षधूपः, सर्जरसः, रालः, सर्वरसः; 'artificial i.' वृकधूपः, कृत्रिमधूपकः. **-v. t.** धूप् 1 P, 10, धूपेन वास् 10. 2 उत्तिज् c., उद्दीप् c., संधुक्ष्, धुक्ष् 10, क्षुभ् c., कुप् c., प्रकुप् c.; *See* **Enrage.** **-Incensory,** *s.* धूपपात्रं-भाजनं.

**Incentive,** *s.* प्रलोभनं, प्रचोदनं, प्रवर्तनं, उत्तेजनं, प्रोत्साहनं; प्रेरणं, प्रणोदनं, उद्बोधकं. 2 कारणं, निमित्तं, प्रयोजनं, हेतुः. **-a.** प्रवर्तक, प्रचोदक, &c.

**Inception,** *s.* प्रारंभः, उपक्रमः.

**Incertitude,** *s.* विकल्पः, शंका, अनिर्णयः.

**Incessant,** *a.* सतत, अविरत, अनवरत, अविच्छिन्न, अविश्रांत, प्रसक्त. **-ly,** *adv.* अनवरतं, सततं, अजस्रं, अविच्छेदं, अश्रांतं, सर्वदा, प्रसक्तं, निरंतरं, अभीक्ष्णं.

**Incest,** *s.* व्यभिचारः, अगम्यगमनं; oft. by गमनं; 'i. with a mother, sister &c.' मातृगमनं; स्वसृगमनं, &c. **-uous,** *a.* अगम्यगामिन्, व्यभिचारिन्; 'i. son' मातृगामिन् *m.*

**Inch,** *s.* अंगुलः; 'not even an i.' न रेखामात्रमपि, नाल्पमपि; 'by i. es' अल्पाल्पं, अल्पशः.

**Inchastity,** *s.* व्यभिचारः; असतीत्वं, पांसुलता (of women ).

**Inchoate,** *a.* उपक्रांत, अचिरमारब्ध. 2 असंपूर्ण. **-ion,** *s.* उपक्रमः, प्रारंभः.

**Incident,** *s.* वृत्तं, वृत्तांतः, व्यतिकरः, प्रसंगः, संगति *f.*, घटना. 2 उपाख्यानं, प्रासंगिककथा. **-al,** *a.* प्रासंगिक-आनुषंगिक-आगंतुक-आकस्मिक-आपतिक-नैमित्तिक- ( की *f.* ), आहार्य, आगंतु, अप्रस्तुत, अप्रकृत; 'i. cause' आगंतुकारणं, कार्यनिमित्तं. **-ally,** *adv.* प्रसंगतः, प्रसंगवशात्, यदृच्छया, कथाप्रसंगेन, कार्यकारणतः, दैवात्, आगंतुकतया.

**Incinerate,** *v. t.* भस्मसात्कृ 8 U, भस्मीकृ.

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007